# संस्कृतसप्ताहः

**दिनाङ्कः - ०३-०९.०८.२०२०**


राष्ट्रियसंस्कृतविश्वविद्यालये ऐषमः संस्कृतसप्ताहमहोत्सवः महता वैभवेन ०३.०८.२०२० दिनाङ्कादारभ्य ०९.०८.२०२० दिनाङ्कपर्यन्तं समाचर्यत । कोरोना-महामारीसन्दर्भेऽस्मिन् अन्तर्जालमाध्यमेन समेषां निमित्तं विविधाः कार्यक्रमाः समायोज्यन्त । ०३.०८.२०२० दिनाङ्के प्रातः १०.३० वादने भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य महामन्त्रिणं मान्याः **डा. रमेश-पोखरियालनिशङ्कमहोदयाः** मुख्यातिथिपदं विभूष्य संस्कृतसप्ताहसमारोहमुदघाटयन् । मान्याः कुलपतयः **आचार्याः वि. मुरलीधरशर्ममहोदयाः** स्वागतभाषणं व्यदधुः । मान्याः कुलसचिवाः **आचार्याः जि.यस्.आर्. कृष्णमूर्तिमहोदयाः** धन्यवादसमर्पणमकार्षुः । शैक्षिकसंकायप्रमुखाः **आचार्याः राणिसदाशिवमूर्तिमहोदयाः** सभासंचालनमकुर्वन् । इत्थं संस्कृतसप्ताहोद्घाटनकार्यक्रमः माननीयानां मन्त्रिणां करकमलाभ्यां संजात इति वैषिष्ट्यम् ।








संस्कृतसप्ताहेऽस्मिन् प्रतिदिनमेकैकः कार्यक्रमः समायोज्यत। यथा – कवितागोष्ठी, सङ्गीतनृत्यसभा,सर्वविभागीयसंगोष्ठ्यः, शास्त्रार्थसंगोष्ठी, भाषाकौशलम्, बालगोकुलम्, शास्त्रीयं व्याख्यानम् इत्येवं कार्यक्रमाः छात्राणामध्यापकानां चोपस्थितौ महता उत्साहेन समायोजिषत । अपि च विश्वविद्यालयस्य अध्यापकैः छात्रैश्च आधुनिकमाध्यमानां सहयोगेन विविधानि दृश्यमुद्रणानि निर्माय आमुखपटलादिषु अध्यारोप्यन्त । पुनश्च ग्रन्थाध्ययनसप्ताहत्वेन **कर्णभारम्** इति नाटकमपि समेषां निमित्तम् आयोज्यत ।





**संस्कृतसप्ताहे संगीतकार्यक्रमः**




संस्कृतसप्ताहे विविधशास्त्रेषु विदुषां शास्त्रसंगोष्ठी




संस्कृतसप्ताहे बालगोकुलच्छात्राणां कार्यक्रमः




संस्कृतसप्ताहे विदुषां कवितागोष्ठी

## संस्कृतसप्ताहस्य समापनमहोत्सवः

०९.०८.२०२० दिनाङ्के संस्कृतसप्ताहमहोत्सवस्य समापनसमारोहे संस्कृतसंवर्धनप्रतिष्ठानस्य न्यासिसचिवाः पद्मश्रीविभूषिताः मान्याः चमूकृष्णशास्त्रिमहोदयाः मुख्यातिथित्वेन समायासिषुः। समापनमहोत्सवे शास्त्रिमहोदयानां **"संस्कृतशिक्षणम् अन्तर्जालीयाः अवसराश्च"** इति विषयमभिलक्ष्य विशिष्टव्याख्यानमप्यायोजितमासीत् । अस्मिन् अवसरे संस्कृतज्ञैः कर्तुं शक्याः करणीयाश्च बहव उपायाः समसूच्यन्त । मान्याः कुलाधिपतयः **श्रीमन्तः नी. गोपालस्वामिवर्याः** आध्यक्ष्यं निरवहन्। मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः समागतानां स्वागतं व्याहरन् । शैक्षिकप्रमुखाः **आचार्याः राणिसदाशिवमूर्तिमहोदयाः** सम्पूर्णसंस्कृतसप्ताहकार्यक्रमस्य इतिवृत्तमवोचन् सभासंचानं चाकुर्वन्। **आचार्याः प्रह्लादजोशिमहोदयाः** धन्यवादसमर्पणमकुर्वन्। विश्वविद्याम्र लयस्य नैके छात्राः अध्यापकाश्च कार्यक्रमेऽस्मिन् उपस्थिताः। इत्थं विविधकार्यक्रमैः ऐषमः संस्कृतमहोत्सवः महता उत्साहेन समपद्यत।